# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – रामानुजवेदान्तः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – श्रीभाष्यम् (द्वितीयोऽध्यायः)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या।**

१ असदिति चेन्न प्रतिषेधमात्रत्वात्।
२ भावे चोपलब्धेः।
३ अन्यत्राभावाच्च न तृणादिवत्।
४ उभयथाऽपि न कर्मातस्तदभावः।

**प्रश्नः २** कार्यकारणयोर्जगद्ब्रह्मणोः श्रुतिसमन्वयसिद्धमभेदत्वं युक्तं न वा इति यथासिद्धान्तं विशदयत।

**प्रश्नः ३** स्मृत्यधिकरणं यथासिद्धान्तं विवेचयत।

**प्रश्नः ४** असम्भवाधिकरणं यथाभाष्यं व्याख्यात।

**प्रश्नः ५** समुदायाधिकरणं यथाग्रन्थं प्रतिपादयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या।**
१ नाभाव उपलब्धेः।
२ न विपदश्रुतेः।
३ तथा प्राणाः।
४ त इन्द्रियाणि तद्व्यपदेशाद् अन्यत्र श्रेष्ठात्।

**प्रश्नः ७** परायत्ताधिकरणं यथाग्रन्थं विवेचयत।

**प्रश्नः ८** जीवस्वरूपं यथाभाष्यं विवेचयत ।

**प्रश्नः ९** जीवस्य कर्तृत्वं किं स्वातन्त्र्येण उत परमात्मायत्तमिति यथाग्रन्थं स्पष्टयत ।

**प्रश्नः** १० इन्द्रियाधिकरणं भाष्यदिशा व्याख्येयम् ।

**प्रश्नः** ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ प्रथमपादे कति सूत्राणि सन्ति ?
२ किन्नामाधिकरणम् ?
३ जगतः कारणं किम् ?
४ जगत्सर्वं कस्य शरीरम् ?
५ गुणाः कति सन्ति ? के च ते ?
६ चिदचिन्मिश्रजगत्सर्गे प्रयोजनं किमस्ति ?
७ परमाणुकारणवादिनः के ?
८ विज्ञानमात्रास्तित्ववादी कः ?
९ जैनमते जीवस्य लक्षणं किम् ?
१० जीवस्याप्युत्पत्तिर्भवति न वा ?
११ जीवात्मा ज्ञातृत्वस्वरूपः वा ज्ञानस्वरूपः ?
१२ इन्द्रियाणि किं सप्तैव स्युः उत एकादश ?
१३ चतुर्थे पादे कति सूत्राणि सन्ति ?
१४ द्वितीयाध्यायस्य नामधेयं किम् ?
१५ श्रीभाष्यं केन रचितम् ?

****